# Shri Bhagavan Kala Sahasra Namavalih 1000 Names

# श्री भगवान् कालसहस्रनामावलिः

## Document Information

Text title : Shri Bhagavan Kala Sahasra Namavali 1008 Names

File name : kAlanAmAShTottarasahasranAmAvaliH.itx

Category : sahasranAmAvalI, deities_misc

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : See corresponding stotram

Latest update : January 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 12, 2021

*sanskritdocuments.org*

# श्री भगवान् कालसहस्रनामावलिः

कालोऽहम् ।

अस्य श्रीकालनामाष्टोत्तरसहस्रस्य अनन्त ऋषिः, अनुष्टुप् छन्दः, अक्षरात्मा देवता । द्रव्यं बीजं। खं शक्तिः, सर्वमूलं कीलकम् । आत्मनों वाङ्मनःकायोपार्जितमननिवारणार्थं भगवान् कालप्रीत्यर्थे अमुककामनासिद्ध्यर्थं पाठे होमे वा विनियोगः ॥

अथ न्यासः -
कालोऽहं अङ्गुष्ठाभ्यां नमः इत्यादि ॥

अथ प्राणायामः । कालोऽहमिति मन्त्रेण ॥

अथ ध्यानम् -
किरीटिनं चक्रधरं चतुर्भुजन्त्रिलोचनमक्षधरं सपात्रकम् ।
द्रव्यात्मकं शून्यमयं परात्परं नमामिकालं वरदं प्रसन्नमम् ॥

अथ गायत्री -
द्रव्यात्मकाय विद्महे । खमात्मकाय धीमहि ।
तन्नः सर्वव्यापकः प्रचोदयात् ॥

अथ नामावलिः -

ॐ कालाय नमः । कालकालाय । कालरूपाय । कलात्मकाय । कलनात्मककालज्ञाय । केवलाय । कालनायकाय । चिदानन्दक्रियाज्ञानमिच्छाशक्तिस्वरूपकाय । एकानेकाय । अद्वयाय । नित्याय । बुद्ध्याऽऽपरिमिताय । अमिताय । अनाद्यनन्तकूटस्थाय । पुराणाय । पुरुषोत्तमाय । शाश्वताय । शाश्वतानन्दाय । कैवल्याय । अकेवलाय नमः । २०

ॐ अकुलाय नमः । जगदीश्वराय । सूत्रात्मने । वेदात्मने । श्रुतिपारगाय । कर्त्रे । अभोक्त्रे । सदासाक्षिणे । विधात्रे ।

परमेश्वराय । त्रिकालस्थूलरूपज्ञाय । त्रिकालभ्रमकारकाय ।
प्रथमाय । प्रथमशब्दाय । स्वप्रकाशाय । प्रकाशमते ।
चराचरमयाय । अमायिने । सततं मुनिचिन्तिताय । एकरूपाय नमः । ४०

ॐ बृहद्रूपाय नमः । सरूपाय । रूपवर्जिताय । सर्वशक्तिमयदेवाय ।
सर्वात्मने । सर्वतोमुखाय । परमाय । परमानन्दाय । सर्वेशाय ।
सर्वभावनाय । गोपस्थाय । गोचराय । गुप्ताय । गोपनीयाय ।
गुहाशयाय । सर्वत्रसर्वगाय । सर्वाय । सुगमाय । दुर्गमाय ।
अगमाय नमः । ६०

ॐ श्रीस्तुताय नमः । श्रीधराय । श्रीदाय । शरणागतवत्सलाय ।
सर्वसिद्धिप्रदाय । शक्ताय । विशिष्टनवसिद्धिदाय । आधिव्याधिहराय ।
ईशाय । तापत्रयनिवारकाय । भक्तानां परमोपायाय । सुखानन्दाय ।
सुखार्णवाय । हेमवर्णाय । चतुर्बाहवे । त्रिनेत्राय । विशदप्रभाय ।
पीताम्बराय । श्वेतवाससे । कस्तूरीकुङ्कुमप्रियाय नमः । ८०

ॐ ज्ञानेश्वराय नमः । ज्ञानगम्याय । ज्ञानविज्ञानचेतनाय ।
ज्ञानाकाराय । ज्ञानमूर्तये । ज्ञानाज्ञानपराय । अपराय । योगेन्द्राय ।
योगिराज्ञे । योगिने । योगिनां शाश्वतालयाय । कोमलाय । कुन्तलाय ।
कान्ताय । कामदाय । कामकारकाय । निर्ममाय । निष्क्रियाय । अनन्ताय ।
निर्विकाराय नमः । १००

ॐ विकारकृते नमः । निष्कलाय । निस्पृहाय । मेध्याय ।
निष्प्रपञ्चाय । निरास्पदाय । सर्वार्थाय । सर्वतोभद्राय ।
सर्वकारणकारणाय । अखिलाय । निखिलानन्दाय । बुद्धिदाय ।
बुद्धिसत्तमाय । सर्वश्रेष्ठगुणोपेताय । समन्ततः कामाचाराय ।
प्रवीणाय । कोविदाय । प्राज्ञाय । सर्वमङ्गलमङ्गलाय ।
निरालम्बाय नमः । १२०

ॐ निरावासाय नमः । निराभासाय । निराश्रयाय । निरातङ्काय ।
निराकामाय । निराधाराय । निराकुलाय । जगत्कर्त्रे । जगद्भर्त्रे ।
जगद्धर्त्रे । जगत्पतये । जगत्त्रात्रे । जगच्छास्त्रे । जगद्बन्धवे ।
जगत्पित्रे । जितेन्द्रियाय । जितप्राणाय । सर्वाग्र्याय । सर्वनायकाय ।
सर्वकामप्रदाय नमः । १४०

ॐ कामाय नमः । पूर्णकामाय । परन्तपाय । श्वासोच्छ्वासगतिर्यन्त्रे ।

प्राणायामिने । पुरातनाय । पञ्चप्राणपतिप्राणाय । प्राणदाय ।
प्राणवल्लभाय । अमूर्ताय । मूर्तिमते । मूर्तये । तुरीयाय ।
तमसःपराय । अजेयाय । सर्वजिते । जेत्रे । अक्षरात्मने । क्षयाय ।
अक्षयाय नमः । १६०

ॐ स्वरव्यञ्जनवर्णात्मने नमः । शब्दाय । वाक्याय । रसामृताय ।
वाक्पटवे । मूकाय । वाचालाय । निपुणाय । कुशलाय । अक्षमाय ।
अजराय । निर्जराय । अमर्त्याय । सदास्थायिने । सनातनाय । अमराय ।
विजराय । भौमाय । नित्ययुक्ताय । निरञ्जनाय नमः । १८०

ॐ भीष्मरूपधराय नमः । घोराय । सर्वविघ्नविनाशनाय ।
समुखाय । दुर्मुखाय । धीराय । शोकसङ्कटहारकाय । मन्त्रज्ञाय ।
यन्त्रतन्त्रज्ञाय । सर्वशास्त्रविदां वराय । श्रुतिवेदाङ्गनिर्मात्रे ।
निगमागमदर्शनाय । अलोकाय । लोकपालेशाय । लौकिकाय । लोकनन्दनाय ।
असङ्ख्यलोकानां नियन्त्रे । सलोकाय । लोकवर्जिताय ।
विश्वेश्वराय नमः । २००

ॐ विश्वजीवाय नमः । विश्वनेत्राय । विशाम्पतये । पूतात्मने ।
पूतकृते । पुण्याय । पुण्यशीलाय । परावराय । भूधराय ।
भूपतये । भूम्ने । भरताय । भारतेश्वराय । अल्पाय । हिमालयाय ।
विन्ध्याय । जलस्थलविभाजकाय । अन्तानन्ताय । विशिष्टेष्टाय ।
जीवजन्तुनमस्कृताय नमः । २२०

ॐ सदातुष्टाय नमः । सदाशान्ताय । सदातृप्ताय । सदार्चिताय ।
महावीराय । महेष्वासाय । महापूरुषपूर्वजाय । महादेहाय ।
महाबाहवे । महज्ज्योतिषे । महद्यशसे । महासीनाय । महाचित्ताय ।
महासत्त्वाय । महातपसे । महानन्दाय । महाकायाय । महद्योनये ।
महद्बलाय । सत्यसङ्कल्पाय नमः । २४०

ॐ आरूपाय नमः । सत्यकामाय । विभूषकाय । सत्यदेवाय । सत्यशीलाय ।
सत्यरूपाय । सुदर्शनाय । भूतस्थाय । सर्वभूतात्मने ।
प्रत्यक्षाय । पृथक् अव्यक्तिताय । धीमयाय । असाध्यसम्भाव्याय ।
सत्यसन्धाय । महाजनाय । परन्तत्त्वाय । परंज्ञानाय ।
परंश्रेयसे । परम्प्रभाय । परंसत्याय नमः । २६०

ॐ परन्धामाय नमः । परंशान्तये । परम्पदाय । अणवेआत्मने ।
विराटात्मने । सर्व्यव्यापिने । प्रबोधकाय । अन्तस्थाय । परमाकाशाय ।
चिदाकाशनिवस्थिताय । स्वयञ्जीवाय । स्वयम्बीजाय । स्वयमात्मने ।
स्वयंरताय । स्वयंस्त्रष्ट्रे । स्वयम्भर्त्रे । स्वयंविपरिणामकाय ।
त्रुटये । काष्ठायै । लवाय नमः । २८०

ॐ यामाय नमः । पलाय । प्रहराय । दिनाय । निशायै । पक्षाय ।
मासाय । ऋतवे । वर्षाय । कल्पाय । वेलान्तराय । युगाय ।
स्वतन्त्राय । अनायत्ताय । स्वैरिणे । आत्मतन्त्राय । अपरायताय ।
सकलाय । सकलानन्दाय । परानन्दाय नमः । ३००

ॐ परोदयाय नमः । कामेशाय । कर्मठाय । अकर्त्रे । पूर्णगर्भाय ।
कृषीवलाय । स्वयङ्कर्मणे । स्वयम्भोक्त्रे । स्वयन्द्रष्ट्रे ।
स्वयम्मयाय । भूतेश्वराय । भूतयोनये । गुहाचाराय । गुहास्थिताय ।
सर्वाश्चर्यमयाश्चर्याय । सर्वलोकप्रियङ्कराय । सुलभाय ।
दुर्लभाय । अलभ्याय । सबलाय नमः । ३२०

ॐ दुर्बलाय नमः । बलिने । अबलायै । बालिकायै । बालायै । प्रबलाय ।
पुरुषाय । पुम्से । याचकाय । धनवते । दीनाय । निर्धनाय ।
वसुमते । ऋणिने । प्रार्थकाय । प्रार्थनायै । भिक्षायै । भिक्षवे ।
त्यागिने । बहुप्रदाय नमः । ३४०

ॐ कठोराय नमः । कर्कशाय । रूक्षाय । दुरावासाय । दुरासदाय ।
समस्तम्लेच्छदुष्टघ्नाय । कृतघ्नाहितध्वंसकाय । निस्सङ्गाय ।
निष्पदाय । अपादाय । प्राप्याय । अप्राप्याय । चलाय । अचलाय ।
शक्तिदाय । कीर्तिदाय । अधीशाय । अलक्ष्याय । लक्ष्याय ।
सुलक्षणाय नमः । ३६०

ॐ करणाय नमः । कारणाय । कर्मणे । कर्माकर्मप्रवर्तकाय ।
बिबुधाग्रचराय । ज्ञात्रे । कार्माय । मानसगोचराय ।
शब्दाशब्दमयोनादाय । शब्दातीताय । रवात्मकाय । प्रकाशाय ।
दीप्तये । भायै । तेजसे । प्रभातीताय । प्रदीप्तिमते । अमोघवचनाय ।
व्योम्ने । लोकमण्डलयोजकाय नमः । ३८०

ॐ त्रपिष्ठाय नमः । ललिताय । असक्ताय । स्वच्छन्दाय ।
विश्वमोहनाय । भक्तानांसुलभावाप्तये । श्रद्धाऽऽस्तिक्यविवर्धकाय ।

मोहकाय । लोभनाय । लुभ्याय । स्निग्धमुग्धाय । अतिसुन्दराय ।
सदानवाय । सदालोलाय । शुचये । श्रेष्ठाय । विदुत्तमाय ।
दिव्यभोगप्रदाय । भोगिने । भोगेन्द्राय नमः । ४००

ॐ भगवते नमः । भगाय । आर्तदुःखहराय । त्राणाय ।
मदमोहमलापहाय । अखण्डैश्वर्यसम्पन्नाय । सर्वश्रेयस्पतिपतये ।
अनाथदीनानां सुनाथाय । कामभोगिनां सुकामाय । सर्वमन्त्राणां
सुमन्त्राय । सर्वतन्त्रिणां सुतन्त्राय । शक्तिबीजमयाय । शून्याय ।
पञ्चतत्त्वपरात्पराय । नवरूपमयाय । ज्योतिषे । अज्योतिषे ।
द्योतकाय । द्युतये । बीजरूपाय नमः । ४२०

ॐ महद्गर्भाय नमः । स्थावराय । जङ्गमाय । अण्डजाय ।
श्रीमयाय । ह्रीमयाय । सौख्यमदोमयाय । इदम्मयाय । क्षेमानन्दाय ।
क्षमाभर्त्रे । क्षमाशीलाय । क्षमायै । अक्षमायै । अध्यात्मविद्यायै ।
विद्याग्र्याय । पुराणछन्दसांवराय । भेदाभेदाय । परंसूत्राय ।
पतिपाशपशुत्रिकाय । प्रकाशात्मने नमः । ४४०

ॐ विमर्शात्मने नमः । शैवानाम्पूर्णमीलनाय । वेदान्तिनान्नेतिनेति
साङ्ख्ययोगविदाङ्गुरवे । अन्यधर्माणां जडमनात्मवादिनां आदिदेवाय ।
आनन्त्यव्यापिने । सर्वज्ञाय । धियादुष्प्रापकीर्तिताय । शीतलाय ।
शम्मयाय । शान्ताय । शान्तभद्राय । प्रसन्नभाय । दुर्जयाय ।
धूर्जयानन्दाय । नीतिज्ञाय । नीतिकृते । नयाय । जयश्रिये ।
जित्वराय । जिष्णवे नमः । ४६०

ॐ जयदाय नमः । जयवर्धनाय । क्षिप्रक्षेमकराय । शुभ्राय ।
शिवदाय । शान्तिदाय । शमाय । ऐश्वर्यशालिने । निर्लेपाय ।
कल्याणाय । मङ्गलाय । शुभाय । स्थूलात्स्थूलतरस्थूलाय ।
विस्तराय । अव्यापकाय । प्रसुवे । सूक्ष्मात्सूक्ष्मतराय । सूक्ष्माय ।
नित्यानित्यविवस्थिताय । तडागाय नमः । ४८०

ॐ तटिन्यै नमः । सिन्धवे । कूपाय । नदनदीपतये ।
उदध्यर्णवकंरूपाय । शून्यसागरमन्थकाय । स्वयंसिद्धये ।
स्वयंसाध्याय । स्वयंसिद्धाय । स्वयङ्कराय । स्वयङ्कर्मणे ।
स्वयङ्कर्त्रे । स्वयमिष्टाय । स्वयम्फलाय । द्रव्यात्मकाय ।
द्रव्यशीलाय । द्रव्यातीताय । खमात्पराय । सुतत्त्वानां आछादनाय ।

पञ्चभूतावगुण्ठनाय नमः । ५००

ॐ कल्लोलरहिताय नमः । अक्षुब्धाय । निःस्त्रोताय । निश्चलाय ।
स्थिराय । बुद्धिज्ञानपरवादिने । सुविवादाय । विवेचनाय ।
सार्धत्रिवलयचक्राय । मूलाधाराय । चतुर्दलाय । स्वाधिष्ठानाय ।
विशुद्धाय । आज्ञायै । अनाहताय । मणिपूरकाय । आयुषे । बलाय ।
यशसे । वर्चसे नमः । ५२०

ॐ सुस्थाय नमः । नीरूजाय- निरूढाय । शर्मदाय । शर्माय । अव्याकुलाय ।
हृदयङ्गमाय । रमाप्रियाय । रमानाथाय । ईप्सितार्थाय । फलप्रदाय ।
पालकाय । पालनाय । गोपाय । कृमिकीटकरक्षित्रे । कौलेशाय ।
कौलसम्पूज्याय । कौलेष्टाय । कौलवन्दिताय । कौलानुगामिनान्तात‍ाय ।
कौलाचारनिरूपकाय नमः । ५४०

ॐ पुरोहिताय नमः । पुरोभागिने । पद्माक्षाय । पद्मभुवे । पटवे ।
अक्षमालाधराय । रम्याय । पक्षापक्षविवर्जिताय । यशोधराय ।
यशोमूर्तये । कामनीयाय । कलाधराय । यशस्विने । प्रशस्याय ।
दक्षाय । सानुरागाय । प्रियाय । अप्रियाय । वरिष्ठाय
वीरकाय नमः । ५६०

ॐ वीराय नमः । वीरेशाय । वीरनन्दनाय । निःशस्त्राय ।
शस्त्रसम्पन्नाय । निरस्त्राय । सन्नदाय । सदसे । वसन्ताय ।
शिशिराय । धर्माय । शरदे । हेमन्ताय । वर्षणाय । ऋतुहर्त्रे ।
ऋतुकर्त्रे । ऋतुपर्ययकारकाय । आद्यमध्यान्तरहिताय ।
आधाराधेयवर्जिताय । सुधाकराय नमः । ५८०

ॐ सुधाहाराय नमः । त्रिदिवातलपूजिताय ।
आन्वीक्षकीत्रयीवार्तादण्डनीतिनिवाहकाय । शासनाय । शासकाय ।
अलिप्ताय । धर्माध्यक्षाय । अधिनायकाय । रतिज्ञाय । रतिनीतिज्ञाय ।
रतिशास्त्रविचक्षणाय । रतिशीलाय । रतिपराय । सुरताय । विरताय ।
रतये । नरेश्वराय । नराराध्याय । नरपूज्याय ।
नरार्थदाय नमः । ६००

ॐ नरोत्तमाय नमः । नरसेव्याय । नरवन्द्याय । नराय । अनराय ।
नित्यविश्वमयाय देवाय । विश्वोत्तीर्णाय । सुविश्वभृते ।
नित्यचिन्मयसामन्ताय । चिन्त्याय । अचिन्त्याय । सुचिन्तिताय ।

उत्तमोत्तमाय । ईशानाय । सुमदाय । निर्मदाय । मदाय । सर्वाध्यक्षाय ।
सर्वकल्पाय । सर्वेशाय नमः । ६२०

ॐ सर्वतारकाय नमः । एकमन्त्रमयाय । मन्त्रिणे ।
कालमन्त्रप्रकाशकाय । मन्त्रमूलाय । मन्त्रवाक्याय । मन्त्रज्ञाय ।
मन्त्रसाधकाय । अदःसेतवे । इदं सेतवे । सेतवे । धर्मसुदुर्गमाय ।
आद्यन्तरहिताय सेतवे । खन्द्रव्यकालिनां सेतवे । अग्रगण्याय ।
प्रत्युत्पन्नाय । सुभगाय । भाग्यवर्धनाय । अनुकामाय ।
प्रियकामाय नमः । ६४०

ॐ भामाय नमः । मोदाय । बृद्धिप्रदाय । हं बीजाय ।
पृथिव्यालम्बाय । अञ्जलाय । प्रौढिरूपकाय । लं अग्निर्वायुबीजाय ।
आं कं आकाशाय । ततः परं (अफ़्तेर् थत्)इस् नोत् अ नमे। । सङ्कल्पाय ।
इष्टं वाञ्छिताय । धर्माधर्माय । नृतानृताय । महाशयाय ।
महज्ज्योतिषे । स्वगाकाराय । परिवृढाय । यज्ञेश्वराय ।
यज्ञमूर्तये नमः । ६६०

ॐ नित्यंयज्ञप्रतिष्ठिताय नमः । अध्वर्याय । होत्रे ।
उद्गात्रे । याजकाय । यजनाय । हविषे । कोषेशाय । कोषदाय ।
कोषाय । निधानाय । निधिनाम्पतये । अर्धरात्रिजपाय । जाप्याय ।
यथेष्टफलदाय । विभवे । अलिङ्गाय । अवचनाय । धात्रे ।
स्वयम्भुवे नमः । ६८०

ॐ जनकाय नमः । भवाय । नानारूपधराय । अरूपाय । अनन्तबाहवे ।
अनन्तदृशे । शून्याधाराय । अशून्यशीलाय । शून्यगर्भाय ।
शमात्मकाय । शून्यारूढाय । शून्यरूपाय । शून्याशून्यप्रतिष्ठिताय ।
दिगम्बराय । दिव्यदेहाय । धर्मात्मने । धार्मिकव्रताय । अन्तःसाक्षिणे ।
बहिःसाक्षिणे । सर्वसाक्षिणे नमः । ७००

ॐ अनुत्तराय नमः । सुबोधाय । सत्यप्रतिज्ञाय । श्रीप्रदाय ।
पुत्रपौत्रदाय । आशापूरयित्रे । दात्रे । कुलसन्ततिवर्धनाय ।
अगम्याय । अगोचराय । अभेद्याय । सिद्धार्थाय । सुकलाय । स्वभुवे ।
अपक्षीयाय । उदासीनाय । दूराय । अदूराय । समाय । असमाय नमः । ७२०

ॐ अतिरूपकराय नमः । सूग्राय । शत्रुघ्नाय । रिपुसूदनाय ।
शीततापहराय । अपापाय । दारूणाय । कटवे । कीकसाय । आचार्याय ।

शिक्षकाय । शिष्याय । पितृदेवाय । गुरोर्गुरवे । मातृदेवाय ।
सुविश्वास्याय । भक्ताय । भक्तजनाय । अर्चकाय । नवमाय नमः । ७४०

ॐ नवमीनाथाय नमः । नवांशाय । नवधाय । नवाय । अनङ्गाय ।
हेमवर्णाङ्गाय । सुवर्णाय । अवर्णवर्णकाय । अगाधाय । सुदृढाय ।
श्रीमते । वायुरूपाय । द्रवाय । जलाय । अनलाय । तत्त्वसंयुक्ताय ।
विमुक्ताय । असीमिताय । अलघवे । मेधादाय नमः । ७६०

ॐ तुष्टिदाय नमः । तुष्टाय । सन्तुष्टाय । विश्रुताय । शुचये ।
अच्छेद्याय । अलोलुपाय । न्याय्याय । सुस्पृहाय । विमृत्यवे । वशिने ।
विशुद्धलोचनाय । दर्शिने । वाङ्मनोगोचरातिगाय । सर्वस्वाय ।
सर्वचैतन्याय । स्वकृताय । स्वधृताय । स्वदाय । पित्रे नमः । ७८०

ॐ पुत्राय नमः । स्वस्त्रे । पुत्रिणे । मात्रे । भ्रात्रे । पितामहाय ।
बन्धवे । मित्राय । पतये । पत्न्यै । सुसेव्याय । कर्मकारकाय ।
समाजाय । निवहाय । वृन्दाय । प्रजातन्त्राय । प्रजापतये । भूपतये ।
विषयाय । राष्ट्राय नमः । ८००

ॐ देशभक्ताय नमः । स्वदेशभृते । अणिमादिगुणोपेताय । गुणातीताय ।
गुणात्मकाय । सहजाय । सहनाय । सत्याय । सुखदुःखविपर्ययाय ।
मनीषिणे । मतिमते । विज्ञाय । वरेण्याय । अकल्मषाय । अनघाय ।
गर्भदाय । गर्भदोषघ्नाय । बीजस्थाय । बीजवर्धनाय ।
शुभाशुभपरित्यागिने नमः । ८२०

ॐ अशुभशुभकारकाय नमः । तेजोराशये । तमोहन्त्रे ।
सर्वभूतमनोहराय । मुक्तहस्ताय । अर्थशास्त्रज्ञाय । सावधानाय ।
निरीक्षकाय । नवद्वारमयाय देहाय । देहिने । देहभृतांवराय ।
कोटिसूर्यप्रतीकाशाय । कोटिचन्द्रांशुनिर्मलाय । कोटितारकनिर्मात्रे ।
कोटिलोकप्रयोजकाय । अखण्डाय । अलवशाय । कल्याय । श्रवणाय ।
श्रावकाय नमः । ८४०

ॐ श्रुतये नमः । प्रमाणाय । प्रत्ययाय । पात्राय । अग्राह्याय ।
ग्रहणाय । ग्रहाय । दयाकराय । दयारूपाय । दयामूर्तये । दयापराय ।
सर्वपापप्रशान्तात्मने । सर्वदुर्गतिहारकाय । मनोजवाय । मरुद्वेगाय ।
भक्तानां पथनायकाय । रणज्ञाय । रणक्षेत्रज्ञाय । युद्धाय ।
योद्ध्रे नमः । ८६०

ॐ भटाय नमः । अभटाय । सौम्याननाय । सौम्यभावाय । भक्तिदाय ।
भक्तवत्सलाय । सर्ववश्यकराय । अवश्याय । सुसम्पन्नाय ।
समायकाय । नित्यतृप्ताय । लसद्भावाय । विश्वपूर्णाय ।
सदाक्षमिने । निराशानांआशाश्रयाय । कृपालवे । करुणाकराय ।
असंप्रज्ञातसंप्रज्ञाय । निष्णाताय । अनश्वराय नमः । ८८०

ॐ अव्ययाय नमः । सर्वधर्माणां सारज्ञाय । लोकधर्मप्रवर्तकाय ।
सुधामयाय । सदारामाय । श्रीघनाय । दृष्टिमोहनाय ।
सूत्रधाराय । जगत्सूत्राय । त्र्यक्षराय । वागधीश्वराय ।
क्षयापस्मारकुष्टघ्नाय । रोगारिष्टनिवारकाय । स्वास्थ्यारोग्यप्रदाय ।
स्वस्थाय । सर्वामयप्रहारकाय । कर्त्रे । अकर्त्रे । अन्यथाकर्त्रे ।
ईश्वराय नमः । ९००

ॐ सर्वशक्तिमते नमः । युगकर्त्रे । युगहर्त्रे । अहोरात्राय ।
चतुर्युगाय । आपदां हन्त्रे । विपद्धर्त्रे । सद्भोगनिलयाय । अच्युताय ।
स्वभावाय । सद्गतये । भावाय । निर्द्वन्द्वाय । द्वन्द्वरूपकाय ।
अनेकरूपवर्णाङ्गाय । पूर्वाय । पूर्वतरोत्तमाय । पावनाय । पवनाय ।
पूताय नमः । ९२०

ॐ पूतनाम्ने नमः । शुचिव्रताय । आशुगाय । अनाशुगाय । अदृश्याय ।
पवित्राय । विमलाय । अमलाय । सुपथाय । पथिकाय । पथे ।
भक्तिमार्गोपदेशकाय । आरण्यकाय । वनस्थायिने । ब्रह्मचारिणे ।
उपासकाय । गृहस्थाय । पूजकाय । पूजायै । ठाकुराय नमः । ९४०

ॐ कुलदेवतायै नमः । मत्स्याय । तिमिङ्गिलाय । ग्राहाय । शुकाय ।
शारिणे । विहङ्गमाय । गायकाय । चित्रकाय । गाथायै । शिल्पाय ।
शिल्पिणे । नटाय । अनटाय । विभ्रमाय । भ्रममोहघ्नाय ।
कल्पवृक्षाय । अश्वत्थाय । तरवे । विटपिने नमः । ९६०

ॐ वल्लर्यै नमः । पुष्पाय । पङ्क्ये । वर्गाय । बहुभुजाय ।
अतलाय । वितलव्यापिने । सुतलाय । तलवर्जिताय । अश्वाय ।
कुरङ्गमाय । धेनवे । शरभाय । सस्तनाय । शिखिने । विज्ञानाय ।
ग्रहजिज्ञासायै । अनन्तानन्त्यमार्गणाय । जीवाय । अजीवाय नमः । ९८०

ॐ दृशोऽव्यक्ताय नमः । परोक्षाय । अव्यक्तसङ्कुलाय ।
अद्वितीयतपोमूर्तये । स्वमायानित्यगोपिताय । सर्वतीर्थमयाय । तीर्थाय ।

आत्मतीर्थनिवस्थिताय । आत्मज्ञाय । आत्मनिर्दिष्टे । आत्मचिदे ।
आत्मधिये । सुधिये । आत्मजिते । आत्मसन्तुष्टाय । आत्मास्वात्मप्रवर्तकाय ।
विश्वश्लाघ्याय । विश्वपूज्याय । विश्ववन्द्याय । मुनीश्वराय नमः । १०००

ॐ विश्वाराध्याय नमः । विश्वश्रेष्ठाय । विश्वेशाय । विश्वराजे ।
ऋषये । अकायाय । कायसम्पन्नाय । परापरमयाय । महते । विशोकाय ।
अशोककौमाराय । सुरेशाय । सुप्रभाय । प्रभवे । १०१४

इति श्री जलाली कौल जियालालेण विरचितं श्रीभगवान्
कालसहस्रनामावलिः समाप्ता ॥

कालोऽहम् ।

Proofread by PSA Easwaran

*Shri Bhagavan Kala Sahasra Namavalih 1000 Names*

pdf was typeset on January 12, 2021

Please send corrections to *sanskrit@cheerful.com*